# टिळक महाराष्ट्र विद्यापीठ, पुणे

R

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जून–जुलै – २०२२**

**सत्र १ ले**

**विषयः अर्थशास्त्र आणि धर्मशास्त्र (19R413)**

**दिनांक :३०/०६/२०२२** **गुण : ६०** **वेळ : दु. २.०० ते ४.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. अधोलिखितेषु केषामपि त्रयाणामनुवादं कुरुत।** (०९)

१. पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु धारयन्।।

२. अग्नौ प्रास्ताहुतिः सम्प्रगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।।

३. सचैलस्नातमाहूय सूर्योदय उपोषितम्। कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ।।

४. सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशाथ वा। रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः।।

५. अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम्। ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः।।

**प्र.२. अधोलिखितेषु त्रयाणां ससन्दर्भं स्पष्टीकरणं कुरुत।** (१५)

१. अप्रणीतस्तु मात्स्यन्यायमुद्भावयति।

२. अर्थमूलौ हि धर्मकामाविति।

३. पादगुणहीनः परिमितार्थः।

४. सुप्तमत्तयोर्हि भावज्ञानं दृष्टम्।

५. प्रथमे रात्रिभागे गूढपुरुषानुत्पादयेत्।

**प्र.३. अधोनिर्दिष्टेषु कस्यापि एकस्य उत्तरं देयम्।** (१२)

१. 'गूढपुरुषोत्पत्तिः' इति विषयमधिकृत्य विवरणं कुरुत।

२. 'राजनीतिविषये इन्द्रियजय आवश्यकः।'– कौटिल्यमतानुसारं लिखत।

३. राजमण्डलस्य सिद्धान्तं स्पष्टीकुरुत।

**प्र.४. अधोलिखितेषु द्वयोः प्रश्नयोः उत्तरे लिखत।** (१८)

१. मनुस्मृतौ निर्दिष्टानष्टविवाहप्रकारान् विवृणुत।

२. लिखितप्रमाणस्य महत्त्वं वर्णयत।

३. वानप्रस्थाश्रमविधिं संपूर्णतया वर्णयत।

**प्र.५. कंसस्थितेषु समुचित पर्यायं विचिनुत।** (०६)

१. कृषिपाशुपाल्ये वणिज्या च ............ । ( आन्वीक्षिकी / त्रयी / वार्त्ता)

२. ........... भूतानामुद्वेजनीयो भवति। (तीक्ष्णदण्डः / मृदुदण्डः / यथार्हदण्डः)

३. परमर्मज्ञः प्रगल्भश्छात्रः ...........। (कापटिकः / उदास्थितः / तापसव्यञ्जनः)

४. ............ चाष्टमोऽधमः । (पैशाचः / गान्धर्वः / राक्षसः)

५. ........... क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्। (पञ्च / षट्/ सप्त)

६. त्वं .......... सत्यधामासि। (तुले / माले/ बाले)

----------